Argala Stotram

अर्गलास्तोत्रम्

SHLOKA · श्लोक

1 ॐ जयन्ती मङ्गला काली भद्रकाली कपालिनी।
दुर्गा क्षमा शिवा धात्री स्वाहा स्वधा नमोऽस्तु ते॥ १॥

Om Jayanti Mangala Kali Bhadrakali Kapalini.
Durga Kshama Shiva Dhatri Svaha Svadha namostu te.

2 जय त्वं देवि चामुण्डे जय भूतार्तिहारिणि।
जय सर्वगते देवि कालरात्रि नमोऽस्तु ते॥ २॥

Jaya tvam devi Chamunde jaya bhutarti harini.
Jaya sarvagate devi Kalaratri namostu te.

3 मधुकैटभविद्राविविधातृवरदे नमः।
रूपं देहि जयं देहि यशो देहि द्विषो जहि॥ ३॥

Madhu Kaitabha vidravi vidhatri varade namah.
Rupam dehi jayam dehi yasho dehi dvisho jahi.

4 महिषासुरनिर्णाशि भक्तानां सुखदे नमः।
रूपं देहि जयं देहि यशो देहि द्विषो जहि॥ ४॥

Mahishasura nirnashi bhaktanam sukhade namah.
Rupam dehi jayam dehi yasho dehi dvisho jahi.

5 रक्तबीजवधे देवि चण्डमुण्डविनाशिनि।
रूपं देहि जयं देहि यशो देहि द्विषो जहि॥ ५॥

Raktabija vadhe devi Chanda Munda vinashini.
Rupam dehi jayam dehi yasho dehi dvisho jahi.

6 शुम्भस्यैव निशुम्भस्य धूम्राक्षस्य च मर्दिनि।
रूपं देहि जयं देहि यशो देहि द्विषो जहि॥ ६॥

Shumbhasyaiva Nishumbhasya Dhumrakshasya cha mardini.
Rupam dehi jayam dehi yasho dehi dvisho jahi.

7 वन्दिताङ्घ्रियुगे देवि सर्वसौभाग्यदायिनि।
रूपं देहि जयं देहि यशो देहि द्विषो जहि॥ ७॥

Vanditanghri yuge devi sarva saubhagya dayini.
Rupam dehi jayam dehi yasho dehi dvisho jahi.

8 अचिन्त्यरूपचरिते सर्वशत्रुविनाशिनि।
रूपं देहि जयं देहि यशो देहि द्विषो जहि॥ ८॥

Achintya rupa charite sarva shatru vinashini.
Rupam dehi jayam dehi yasho dehi dvisho jahi.

9 नतेभ्यः सर्वदा भक्त्या चण्डिके दुरितापहे।
रूपं देहि जयं देहि यशो देहि द्विषो जहि॥ ९॥

Natebhyah sarvada bhaktya Chandike duritapahe.
Rupam dehi jayam dehi yasho dehi dvisho jahi.

10 स्तुवद्भ्यो भक्तिपूर्वं त्वां चण्डिके व्याधिनाशिनि।
रूपं देहि जयं देहि यशो देहि द्विषो जहि॥ १०॥

Stuvadbhyo bhakti purvam tvam Chandike vyadhi nashini.
Rupam dehi jayam dehi yasho dehi dvisho jahi.

11 चण्डिके सततं ये त्वामर्चयन्तीह भक्तितः।
रूपं देहि जयं देहि यशो देहि द्विषो जहि॥ ११॥

Chandike satatam ye tvam archayantiha bhaktitah.
Rupam dehi jayam dehi yasho dehi dvisho jahi.

12 देहि सौभाग्यमारोग्यं देहि मे परमं सुखम्।
रूपं देहि जयं देहि यशो देहि द्विषो जहि॥ १२॥

Dehi saubhagyam arogyam dehi me paramam sukham.
Rupam dehi jayam dehi yasho dehi dvisho jahi.

13 विधेहि द्विषतां नाशं विधेहि बलमुच्चकैः।
रूपं देहि जयं देहि यशो देहि द्विषो जहि॥ १३॥

Vidhehi dvishatam nasham vidhehi balam uchchakaih.
Rupam dehi jayam dehi yasho dehi dvisho jahi.

14 विधेहि देवि कल्याणं विधेहि परमां श्रियम्।
रूपं देहि जयं देहि यशो देहि द्विषो जहि॥ १४॥

Vidhehi devi kalyanam vidhehi paramam shriyam.
Rupam dehi jayam dehi yasho dehi dvisho jahi.

15 सुरासुरशिरोरत्ननिघृष्टचरणेऽम्बिके।
रूपं देहि जयं देहि यशो देहि द्विषो जहि॥ १५॥

Surasura shiro ratna nighrishta charanembike.
Rupam dehi jayam dehi yasho dehi dvisho jahi.

16 विद्यावन्तं यशस्वन्तं लक्ष्मीवन्तं जनं कुरु।
रूपं देहि जयं देहि यशो देहि द्विषो जहि॥ १६॥

Vidyavantam yashasvantam lakshmivantam janam kuru.
Rupam dehi jayam dehi yasho dehi dvisho jahi.

17 प्रचण्डदैत्यदर्पघ्ने चण्डिके प्रणताय मे।
रूपं देहि जयं देहि यशो देहि द्विषो जहि॥ १७॥

Prachanda daitya darpaghne Chandike pranataya me.
Rupam dehi jayam dehi yasho dehi dvisho jahi.

18 चतुर्भुजे चतुर्वक्त्रसंस्तुते परमेश्वरि।
रूपं देहि जयं देहि यशो देहि द्विषो जहि॥ १८॥

Chaturbhuje chaturvaktra sanstute parameshvari.
Rupam dehi jayam dehi yasho dehi dvisho jahi.

19 कृष्णेन संस्तुते देवि शश्वद्भक्त्या सदाम्बिके।
रूपं देहि जयं देहि यशो देहि द्विषो जहि॥ १९॥

Krishnena sanstute devi shashvad bhaktya sadambike.
Rupam dehi jayam dehi yasho dehi dvisho jahi.

20 हिमाचलसुतानाथसंस्तुते परमेश्वरि।
रूपं देहि जयं देहि यशो देहि द्विषो जहि॥ २०॥

Himachala suta natha sanstute parameshvari.
Rupam dehi jayam dehi yasho dehi dvisho jahi.

21 इन्द्राणीपतिसद्भावपूजिते परमेश्वरि।
रूपं देहि जयं देहि यशो देहि द्विषो जहि॥ २१॥

Indrani pati sadbhava pujite parameshvari.
Rupam dehi jayam dehi yasho dehi dvisho jahi.

22 देवि प्रचण्डदोर्दण्डदैत्यदर्पविनाशिनि।
रूपं देहि जयं देहि यशो देहि द्विषो जहि॥ २२॥

Devi prachanda dordanda daitya darpa vinashini.
Rupam dehi jayam dehi yasho dehi dvisho jahi.

23 देवि भक्तजनोद्दामदत्तानन्दोदयेऽम्बिके।
रूपं देहि जयं देहि यशो देहि द्विषो जहि॥ २३॥

Devi bhakta janoddama dattanandodayembike.
Rupam dehi jayam dehi yasho dehi dvisho jahi.

24 पत्नीं मनोरमां देहि मनोवृत्तानुसारिणीम्।
तारिणीं दुर्गसंसारसागरस्य कुलोद्भवाम्॥ २४॥

Patnim manoramam dehi manovrittanusarinim.
Tarinim durga sansara sagarasya kulodbhavam.

25 इदं स्तोत्रं पठित्वा तु महास्तोत्रं पठेन्नरः।
स तु सप्तशतीसंख्यावरमाप्नोति सम्पदाम्॥ ॐ॥ २५॥

Idam stotram pathitva tu maha stotram pathen narah.
Sa tu saptashati sankhya varam apnoti sampadam. Om.

Text checked against: Gita Press, Gorakhpur: Shri Durga Saptashati (code 1281), Sanskrit with Hindi translation. Meanings, audio and all scripts at nityapaath.com/argala-stotram/